# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-8

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** 10 अंकाः

**खण्ड : ख : रचनात्मककार्यम्** 15 अंकाः

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** 25 अंकाः

**खण्ड : घ : पठित-अवबोधनम्** 30 अंकाः

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **10**

पुष्पाणि अतीव मनोहराणि भवन्ति। अस्माकं राष्ट्रिय-पुष्पं कमलं तु अनुपमम् अस्ति। अस्य उत्पत्तिः पंकात् भवति। अतः अस्यनाम पंकजम् अपि प्रसिद्धम् जातम्। इदम् सर्वेषाम् मनांसि आह्लादयति सर्वेभ्यः च रोचते। कमलं निजसौन्दर्येण सुगन्धिना च वैशिष्ट्यं प्राप्नोति। तस्योपरि भ्रमराः गुञ्जन्ति। पंके प्रभवति कमलं, पंकात् कदापि न लिप्तं भवति। कमलस्य पत्रे स्थिताः जलबिन्दवः मुक्ताः इव विभान्ति। सरोवरे विकसितानां कमलानां शोभा दर्शनीया भवति यदा यदा जलस्तरः वर्धते तदा तदा कमलम् अपि उपरि गच्छति। इदम् सूचयति यत् लोके नरः शुभकार्याणि कुर्वन् कदाचिदापि मलिनतायाः लिप्तः न भवति।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) अस्माकं राष्ट्रियपुष्पं किम् अस्ति?
   (ii) कमलस्य उत्पत्तिः कस्मात् भवति?
   (iii) कमलस्योपरि के गुञ्जन्ति?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) 'यदा-यदा जलस्तरं वर्धते तदा कमलम् अपि उपरि गच्छति'- इदम् किम् सूचयति?
   (ii) विकसितानां कमलानां शोभा कीदृशी भवति?
   (iii) कमलस्य पत्रे स्थिताः जलबिन्दवः कीदृशाः दृश्यन्ते?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'कमलम्' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
      (क) वैशिष्ट्यम्
      (ख) अनुपमम्
      (ग) पंकजम्
   (ii) 'कमलानाम्' इति पदस्य विशेषणपदं किम्?
      (क) सर्वेषाम्
      (ख) विकसितानाम्
      (ग) अनुपमम्
   (iii) 'अस्य उत्पत्तिः पंकात् भवति'-अस्मिन् वाक्ये 'अस्य' सर्वनाम पदं कस्मै प्रयुक्तम्?

(क) पुष्पाय

(ख) भ्रमराय

(ग) कमलाय

(iv) 'गुञ्जन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) जलबिन्दवः

(ख) नराः

(ग) भ्रमराः

**उत्तरम् :**

1. (i) कमलम्
   (ii) पंकात्
   (iii) भ्रमराः
2. (i) 'यदा-यदा जलस्तरं वर्धते तदा कमलम् अपि उपरि गच्छति'- इदम् सूचयति यत् लोके नरः शुभकार्याणि कुर्वन् कदाचिदापि मलिनतायाः लिप्तः न भवति।
   (ii) विकसितानां कमलानां शोभा दर्शनीया भवति।
   (iii) कमलस्य पत्रे स्थिताः जलबिन्दवः मुक्ताः इव दृश्यन्ते।
3. **शीर्षक-** कमलस्य महत्त्वम्, सुन्दराणि पुष्पाणि।
4 (i) (ग) पंकजम्
   (ii) (ख) विकसितानाम्
   (iii) (ग) कमलाय
   (iv) (ग) भ्रमराः

## खण्डः - ख 15 अंकाः

## रचनात्मककार्यम्

**2. पितरं प्रति लिखितम् अधः पत्रं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत।** $1/2 \times 10 = 5$

हिमालय-छात्रावासः

(1) ..........।

दिनांकः ..........

पूज्याः

(2) ..........!

सादरं नमः।

अत्र कुशलं तत्रास्तु। इदं ज्ञात्वा भवान् अतिप्रसन्नः भविष्यति यत् गतदिवसे अन्तर्विद्यालयीयवादविवादप्रतियोगितायां मया (3) .......... स्थानं प्राप्तम्। क्रीडादिवसे (4) .......... अहम् एव प्रथमः आसम्। अस्य वर्षस्य नवमकक्षायाः वार्षिकपरीक्षायाम् अपि मया एव प्रथमं स्थानं लब्धम्। अस्मिन् वर्षे वार्षिकोत्सवे मया त्रयः पुरस्काराः (5) ..........। अयं वार्षिकोत्सवः आगामि-बुधवासरे आयोजयिष्यते। विद्यालयस्य पक्षतः ह्य एव (6) .......... प्रेषितम्। अहमपि (7) .......... सूचयामि यद् मात्रा सह (8) .......... आगच्छतु। मम (9) .......... भविष्यति। मातृचरणयोः मम प्रणामाः।

भवतः पुत्रः

(10) .......... ।

| मञ्जूषा |
|---|
| निमन्त्रणपत्रम्, भवन्तं, धावनप्रतियोगितायाम्, सौरभः, उत्साहवर्धनम्, प्रथमम्, पितृमहोदयाः, प्राप्स्यन्ते, अवश्यम्, नवदिल्लीतः। |

**उत्तरम् :**

हिमालय-छात्रावासः

(1) **नवदिल्लीतः**।

दिनांकः ..........

पूज्याः

(2) **पितृमहोदयाः!**

सादरं नमः।

अत्र कुशलं तत्रास्तु। इदं ज्ञात्वा भवान् अतिप्रसन्नः भविष्यति यत् गतदिवसे अन्तर्विद्यालयीयवादविवादप्रतियोगितायां मया (3) **प्रथमम्** स्थानं प्राप्तम्। क्रीडादिवसे (4) **धावनप्रतियोगितायाम्** अहम् एव प्रथमः आसम्। अस्य वर्षस्य नवमकक्षायाः वार्षिकपरीक्षायाम् अपि मया एव प्रथमं स्थानं लब्धम्। अस्मिन् वर्षे वार्षिकोत्सवे मया त्रयः पुरस्काराः (5) **प्राप्स्यन्ते**। अयं वार्षिकोत्सवः आगामि-बुधवासरे आयोजयिष्यते। विद्यालयस्य पक्षतः ह्य एव (6) **निमन्त्रणपत्रम्** प्रेषितम्। अहमपि (7) **भवन्तं** सूचयामि यद् मात्रा सह (8) **अवश्यम्** आगच्छतु। मम (9) **उत्साहवर्धनम्** भविष्यति। मातृचरणयोः मम प्रणामाः।

भवतः पुत्रः

(10) **सौरभः**।

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-** $1 \times 5 = 5$



**मञ्जूषा-**आरोपयति, वन-महोत्सवः, छात्राः, जलपात्रेण, मृत्तिकापात्रेषु, वृक्षान्, पादपान्, अध्यापिकाः, विद्यालये, प्राङ्गणे, पर्यावरण-दृष्ट्या, सिञ्चन्ति।

**उत्तरम् :**

1. अद्य वन-महोत्सवः अस्ति।
2. विद्यालये छात्राः अध्यापकाः अध्यापिकाः च पादपान् रोपयन्ति।
3. अध्यापकाः जलपात्रेण पादपान् सिञ्चन्ति।
4. छात्राः मृत्तिकापात्रेषु पादपान् आनयन्ति।

5. पर्यावरण–दृष्ट्या वन–महोत्सवः महत्त्वपूर्णः अस्ति।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**''शाक–आपणस्य वर्णनम्''**

| |
|---|
| **मञ्जूषा–**विविधाः शाकाः, पलाण्डुः, आलूकम्, गृञ्जनम्, इत्यादयः, क्रेतारः, विक्रेतारः, जनानाम् सम्मर्दः, उच्चैः आहूयन्ति, इतस्ततः, अस्वच्छता, मूल्यं पृच्छन्ति। |

**उत्तरम् :**

**शाक–आपणस्य वर्णनम्**

शाक–आपणे क्रेतारः सन्ति। आपणे विविधाः शाकाः यथा पलाण्डुः आलूकम्, गृञ्जनम् इत्यादयः विक्रीयन्ते। विक्रेतारः उच्चैः जनान् आहूयन्ति। अत्र जनानाम् सम्मर्दः विद्यते। जनाः शाकानाम् मूल्यं पृच्छन्ति। ते इतस्ततः भ्रमित्वा शाकाः क्रयन्ति। अत्र अस्वच्छता वर्तते।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. गाँव के चारों ओर वृक्ष हैं।
   Trees are all around in the village.
2. क्या आपने वह खबर पढ़ी है?
   Have you read that news?
3. वीरता प्रसिद्धि का कारण है।
   Valour is the cause of fame.
4. वह झूठ बोलता है।
   He speak lies.
5. साहस मनुष्य का सबसे बड़ा आभूषण है।
   Courage is the greatest ornament of a man.
6. अपने भाई का नाम बताओ।
   Tell your brother's name.
7. किसान खेत में जाता है।
   The farmer goes to field.

**उत्तरम् :**

1. ग्रामं परितः वृक्षाः सन्ति।
2. अपि त्वं तां वार्ताम् अपठः?/अपि सा वार्ता त्वया पठिता?
3. पराक्रमः कीर्तिकारणम्।
4. सः अनृतं वदति।
5. धैर्यं मनुजस्य/मानवस्य परमभूषणम्।
6. तव भ्रातुः नाम कथय।/निवेदय ते भ्रातुः नाम।
7. कृषकः क्षेत्रे गच्छति।

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. कुक्कुरः इतस्ततः भ्रमति।
   **उत्तरम् :** इतः + ततः
2. जय जगदीशः हरे।
   **उत्तरम् :** जगत् + ईशः
3. मानसः निग्रहः वायोः + इव दुष्कर।
   **उत्तरम् :** वायोरिव
4. छात्रः निर्बलः अस्ति।
   **उत्तरम् :** निः + बलः
5. कथं त्वं विलम्बात् + आगता।
   **उत्तरम् :** विलम्बादागता

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. 'चन्दनरसः' पुरुषं प्रह्लादयति।
   (क) चन्दनाय रसः
   (ख) चन्दनस्य रसः
   (ग) चन्दनः रसः एव
   **उत्तरम् :** (ख) चन्दनस्य रसः
2. शिरः च ग्रीवा च शुकेन कोटरात् बहिः प्रसार्यते।
   (क) शिरग्रीवा
   (ख) शिरोग्रीवम्
   (ग) शिराग्रीवे
   **उत्तरम् :** (ग) शिराग्रीवे
3. लम्बोदरः गणेशः सर्वप्रथमः पूज्यः।
   (क) लम्ब उदरं यस्य सः
   (ख) लम्बम् उदरं यस्य सः
   (ग) लम्बः उदरं यस्य सः
   **उत्तरम् :** (ग) लम्बः उदरं यस्य सः
4. कोकिल आम्रस्य वृक्षे स्थित्वा पञ्चमस्वरेण गायति।
   (क) आम्रवृक्षे
   (ख) आम्राय वृक्षाचा
   (ग) आम्रानां वृक्षायाम्
   **उत्तरम् :** (क) आम्रवृक्षे
5. को भेदः पिकः च काकः च तयोः?
   (क) पिककाकस्य
   (ख) पिककाकानाम्
   (ग) पिककाकयोः

**उत्तरम् :** (ग) पिककाकयोः

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. एषा बाला श्रेष्ठा गायक + टाप् अस्ति।
   (क) गायका
   (ख) गायिका
   (ग) गायकी

   **उत्तरम् :** (ख) गायिका
2. कारवेल्लस्य कटुत्वम् मह्यम् रोचते।
   (क) कटु + त्व
   (ख) कटु + त्वम्
   (ग) कटु + शत्

   **उत्तरम् :** (क) कटु + त्व
3. इयं बालिका कुमार + ङीप् अस्ति्
   (क) कुमारी
   (ख) कुमारम्
   (ग) कुमारि

   **उत्तरम् :** (क) कुमारी
4. गुण+मतुप् सर्वत्र पूज्यते।
   (क) गुणवान्
   (ख) गुणी
   (ग) गुणिमत्

   **उत्तरम् :** (क) गुणवान्
5. जनाः दुष्टानां मूर्ख + तल् दृष्ट्वा उपहसन्ति।
   (क) मूर्खता
   (ख) मूर्खताम्
   (ग) मूर्खतत्वं

   **उत्तरम् :** (क) मूर्खता

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

रोहितः- श्वेते! अधुना कस्यां कक्षायां (1) .......... ?
श्वेता- (2) .......... तु नवम् कक्षायां पठ्यते।
रोहितः- किं (3) .......... मणिकायाः पदानुशीलनीम् पश्यसि?
श्वेता- आम् मया पदानुशीलनी अपि दृश्यते।
रोहितः- शोभनम्, भिधुना आवां चलावः।

| मञ्जूषा |
|---|
| मया, पठसि, त्वम्। |

**उत्तरम् :**
(1) पठसि, (2) मया, (3) त्वम्।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. अहं पत्रं लिखामि।
2. ताः नगरे भ्रमन्ति।
3. सः प्रश्नं पृच्छति।
4. शिष्याः गुरूं प्रणमन्ति।
5. मम मित्रं फलं खादति।

**उत्तरम् :**
1. मया पत्रं लिख्यते।
2. ताभिः नगरे भ्रम्यन्ते।
3. तेन प्रश्नः पृच्छ्यते।
4. शिष्यैः गुरूः प्रणम्यते।
5. मम मित्रेण फलं खाद्यते।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

(1) रमेशः प्रातः (6:00) .......... वादने शय्यां त्यजति।
(2) प्रातः (6:45) ......... वादने विद्यालयं गच्छति।
(3) मध्याह्ने (12:45) .......... वादने विद्यालयात् गृहम् आगच्छति।
(4) रात्रौ (9:00) ......... वादने भोजनं करोति।
(5) पश्चात् (10:30) .......... वादने शयनं करोति।

**उत्तरम् :**
(1) षड्
(2) पादोनसप्त
(3) पादोनएक
(4) नव
(5) सार्धदश

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. सहसा उत्थाय भीमः .......... अवदत्।
2. केनचिदपि समयं ......... न कर्तव्यम्।
3. पिपीलकः .......... चलति।
4. कुक्कुराः .......... भ्रमन्ति।
5. अहं ......... तत्र न अगच्छम्।
6. महीपालः द्वितीयं नेत्रम् .......... तस्मै ददौ।
7. .......... वने पशुमहोत्सवः अस्ति।
8. ......... अहं विद्यालयं गच्छामि।

| मञ्जूषा |
|---|
| इतस्ततः, उच्चैः, वृथा, अधुना, अद्य, सम्प्रति, अपि, शनैः। |

**उत्तरम् :**
1. उच्चैः

2. वृथा
3. शनैः
4. इतस्ततः
5. अधुना
6. अपि
7. अद्य
8. सम्प्रति

**11.अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)**

$1 \times 3 = 3$

1. द्वौ छात्रौ गच्छति। (गच्छतः/गच्छति/गच्छन्ति)
2. मम मित्रं कठोरः अस्ति। (कठोर/कठोरा/कठोरम्)
3. रुग्णम् निःशुल्कम् औषधं प्रयच्छति। (रुग्णेभ्यः/रुग्णाः/रुग्णेः)
4. सः लता अस्ति। (सा/स/वयं)

**उत्तरम् :**

1. गच्छतः
2. कठोरम्
3. रुग्णेभ्यः
4. सा

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ।तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रूग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः।। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत् ।

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागतः। करूणापरो गृही तस्मै आश्रयं प्रायच्छत्।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) निशान्धकारे प्रसृते कुत्र पदयात्रा न शुभावहा?
   (ii) भूरि परिश्रम्य कः किञ्चिद् वित्तमुपार्जितवान्?
   (iii) निर्धनस्य तनयः कुत्र निवसन् अध्ययने संलग्नः आसीत्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) निर्धनः जनः किमर्थं व्याकुलो जातः?
   (ii) निर्धनः जनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'पुत्रः' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
   (क) तनयः
   (ख) संलग्नः
   (ग) जातः
   (ii) 'गृही' इत्यस्य किं विशेषण पदं गद्यांशे प्रयुक्तम्?
   (क) निर्धनः
   (ख) भूरि
   (ग) करुणापरः
   (iii) 'गृही' इत्यस्य किं क्रियापदं प्रयुक्तम्?
   (क) प्रायच्छत्
   (ख) प्राचलत्
   (ग) प्रस्थितः
   (iv) 'प्राचलत्' क्रियायाः कर्तृपदं किम्?
   (क) पुत्रः
   (ख) निर्धनः जनः
   (ग) गृही

**उत्तरम् :**

1 (i) विजने प्रदेशे।
(ii) निर्धनः जनः।
(iii) छात्रावासे।

2 (i) निर्धनः जनः स्वपुत्रस्य रूग्णतामाकर्ण्य व्याकुलो जातः।
(ii) निर्धनः जनः एकस्मिन् महाविद्यालये स्वपुत्रं प्रवेशं दापयितुं सफलो जातः।

3 (i) (क) तनयः।
(ii) (ग) करूणापरः।
(iii) (क) प्रायच्छत्।
(iv) (ख) निर्धनः जनः।

**13.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहु महात्मानः समत्वमिति तथ्यतः।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) चित्ते का भवेत्?
   (ii) तदेव समत्वं के कथयन्ति?
   (iii) मनसि वाचि च अवक्रता किं कथ्यते?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) अवक्रता कुत्र भवेत्?
   (ii) महात्मानः तथ्यतः किं समत्वम् आहुः?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'आहु' इति क्रियापदस्य कर्तृपदं किम्?
   (क) महात्मानः
   (ख) चित्तम्
   (ग) तदेव

(ii) 'वक्रता' इत्यस्य श्लोके विलोमपदं किं प्रयुक्तम्?
(क) भवेत्
(ख) अवक्रता
(ग) आहुः

(iii) 'वाण्याम्' इति पदस्य श्लोकात् पर्यायपदं चित्वा लिखत।
(क) आहुः
(ख) वाचि
(ग) यथा

(iv) 'अवक्रता' इत्यस्य किं क्रियापदं प्रयुक्तम्?
(क) आहुः
(ख) तथा
(ग) भवेत्

**उत्तरम् :**

1. (i) अवक्रता।
(ii) महात्मानः।
(iii) समत्वम्।
2. (i) अवक्रता चित्ते वाचि च भवेत्।
(ii) मनसि वाचि च समानरूपेण अवक्रतां महात्मानः तथ्यतः समत्वम् आहुः।
3. (i) (क) महात्मानः।
(ii) (ख) अवक्रता।
(iii) (ख)वाचि।
(iv) (ग) भवेत्।

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

लवः आर्यस्य वंदनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवंदनायाम् .......... ।
कुशः अहमपि कुश इत्यात्मानं श्रावयामि।
रामः अहो! उदात्तरम्यः समुदाचारः।
किं नामधेयो भवतोर्गुरूः?
लवः ननु भवान् वाल्मीकिः।
रामः केन संबंधेनः
लवः उपनयनोपदेशेन।
रामः अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।
लवः न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
(i) कुशलवयोः गुरुः नाम किमासीत्?
(ii) केन संबंधेन वाल्मीकिः कुशलवयोः गुरुः आसीत्?
(iii) लवकुशयो जनकं नामतो वेदितुं कः इच्छति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
(i) अहो! उदात्तरम्यः समुदाचारः इति कः कथयति?
(ii) पितुः नामविषये लवः किं कथयति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
(i) 'अहमपि कुश इत्यात्मानं श्रावयामि' अत्र क्रियापदं किम्?
(क) श्रावयामि
(ख) पश्यामि
(ग) गच्छामि
(ii) 'जननी' इति पदस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?
(क) रामम्
(ख) विदूषक
(ग) जनक
(iii) 'शिष्टाचारः' इति पदस्य पर्यायपदं नाट्यांशे किं प्रयुक्तम्?
(क) उदारः
(ख) आचारः
(ग) समुदाचारः
(iv) 'आर्यस्य वन्दनायां लव इत्यात्मनं श्रावयामि' अस्मिन् वाक्ये कर्तृपदं किम्?
(क) लवः
(ख) कुशः
(ग) रामः

**उत्तरम् :**

1. (i) वाल्मीकिः
(ii) उपनयनोपदेशेन
(iii) रामः
2. (i) इति श्रीरामः कथयति।
(ii) लवः कथयति यत् न हि जानाम्यस्य नामाधेयम्।
3. (i) (क) श्रावयामि
(ii) (ग) जनक
(iii) (ग) समुदाचारः
(iv) (क) लवः

**15. रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्) $1 \times 4 = 4$**

1. कश्चन निर्धनो जनः परिश्रम्य वित्तमुपार्जितवान्।
2. तेन स्वपुत्रस्य एकस्मिन् महाविद्यालये प्रवेशः कारितः।
3. तस्य पुत्रः छात्रावासे निवसन् अध्ययनं करोति स्म।
4. सः जनः पुत्रस्य रूग्णताम् आकर्ण्य व्याकुलो जातः।
5. निर्धनः जनः पुत्रं द्रष्टुं प्रस्थितः।

**उत्तरम् :**

1. कश्चन निर्धनो जनः कथं वित्तमुपार्जितवान्?
2. तेन स्वपुत्रस्य कुत्र प्रवेशः कारितः?
3. तस्य पुत्रः कुत्र निवसन् अध्ययनं करोति स्म?
4. सः जनः कस्य रूग्णताम् आकर्ण्य व्याकुलो जातः?
5. निर्धनः जनः कम् द्रष्टुं प्रस्थितः?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते।।
**अन्वयः-** व्यायामात्, श्रमक्लम-पिपासा-(1) .......... शीतादीनां (2) .......... च परमम् (3) .......... अपि (4) ..........।

II. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।। $1/2 \times 4 = 2$
**अन्वयः-** मनुष्याणां (1) .......... महान् शत्रुः (2) ..........। उद्यमसमः (3) .......... न अस्ति। यं कृत्वा (मनुष्यः) न (4) ..........।

| **मञ्जूषा** |
|---|
| आरोग्यम्, उष्ण, उपजायते, सहिष्णुता, बन्धुः, आलस्यम्, शरीरस्थः, अवसीदति। |

**उत्तरम् :**
**अन्वयः-** I (1) उष्ण, (2) सहिष्णुता, (3) आरोग्यम्, (4) उपजायते।
**अन्वयः-** II (1) शरीरस्थः, (2) आलस्यम्, (3) बन्धुः, (4) अवसीदति।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

सुलभेष्वर्थलाभेषु, परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

**भावार्थः-** चाणक्यः चन्दनदासस्य .......... कुर्वन् कथयति यत् यथा राज्ञा .......... परोपकारार्थं कपोतरक्षणार्थं स्वशरीरमपि अर्पितम्, तथैव चन्दनदासः .......... अमात्यराक्षसस्य गृहजनं राजदण्डं स्वीकृत्य अपि स्वगृहे रक्षति। वस्तुतः संसारे अर्थलाभेषु सुलभेषु .......... शिविना विना एतादृशं दुष्करं कोऽपि कर्तुं न प्रभवति।

| **मञ्जूषा-** स्वमित्रस्य, शिविना, प्रशंसां, परसंवेदने |
|---|

**उत्तरम् :**
**भावार्थः-** चाणक्यः चन्दनदासस्य **प्रशंसां** कुर्वन् कथयति यत् यथा राज्ञा **शिविना** परोपकारार्थं कपोतरक्षणार्थं स्वशरीरमपि अर्पितम्, तथैव चन्दनदासः **स्वमित्रस्य** अमात्यराक्षसस्य गृहजनं राजदण्डं स्वीकृत्य अपि स्वगृहे रक्षति। वस्तुतः संसारे अर्थलाभेषु सुलभेषु **परसंवेदने** शिविना विना एतादृशं दुष्करं कोऽपि कर्तुं न प्रभवति।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृहणाच्च।
2. चौरः तत्रनिहितामेकां मञ्जूषाम् आदाय पलायितः।
3. न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुंमादिष्टवान्।
4. रात्रौ तस्मिन् गृहे कश्चन चौरः प्रविष्टः।
5. कश्चन निर्धनः जनः स्वस्थ रुग्णं पुत्रं द्रष्टुं प्रस्थितः।
6. रक्षापुरुषः तमतिथिं चौरोऽयमिति प्रख्याप्य कारागृहे प्राक्षिपत्।
7. न्यायाधीशः प्रमाणाभावात् निर्णेतुं नाशक्नोत्।
8. सः रात्रिनिवासं ग्रामे कर्तुं किञ्चिद् गृहस्थमुपागतः।

**उत्तरम् :**
1. कश्चन निर्धनः जनः स्वस्थ रुग्णं पुत्रं द्रष्टुं प्रस्थितः।
2. सः रात्रिनिवासं ग्रामे कर्तुं किञ्चिद् गृहस्थमुपागतः।
3. रात्रौ तस्मिन् गृहे कश्चन चौरः प्रविष्टः।
4. चौरः तत्रनिहितामेकां मञ्जूषाम् आदाय पलायितः।
5. प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृहणाच्च।
6. रक्षापुरुषः तमतिथिं चौरोऽयमिति प्रख्याप्य कारागृहे प्राक्षिपत्।
7. न्यायाधीशः प्रमाणाभावात् निर्णेतुं नाशक्नोत्।
8. न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुंमादिष्टवान्।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत-** $1 \times 3 = 3$
(केवलं प्रश्नत्रयम्)

| क | ख |
|---|---|
| अर्दयन्ति | गरुडः |
| अरयः | जरा |
| वार्धक्यम् | शत्रवः |
| वैनतेयः | पीडयन्ति |

**उत्तरम् :**

| | | |
|---|---|---|
| अर्दयन्ति | = | पीडयन्ति |
| अरयः | = | शत्रवः |
| वार्धक्यम् | = | जरा |
| वैनतेयः | = | गरुडः |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. समस्य <u>जनकः</u> दशरथः आसीत्।
(क) पिता
(ख) पुत्र
(ग) माता
**उत्तरम् :** (क) पिता
2. <u>अखण्डिता</u> में वाणिज्या।
(क) निर्बाधा
(ख) बाधा

(ग) दुष्टता

**उत्तरम् :** (क) निर्बाधा

3. अस्मिन् जलाशये निर्मलं जलं नास्ति।

(क) समलम्

(ख) स्वच्छम्

(ग) मलिनम्

**उत्तरम् :** (ख) स्वच्छम्

4. वने सा सिंह ददर्श।

(क) अपश्यत्

(ख) दर्शक

(ग) द्रष्टुं

**उत्तरम् :** (क) अपश्यत्

WWW.CBSE.ONLINE

Download unsolved version of this paper from
www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.